कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

॥ अथ तृतीय काण्डे चतुर्थः प्रश्नः॥

हरिः ओम्॥ वि वा एतस्य यज्ञ ऋध्यते यस्य हविरतिरिच्यते सूर्यो देवो दिविषद्भ्य इत्याह बृहस्पतिना चैवास्य प्रजापतिना च यज्ञस्य व्यृद्धमपि वपति रक्षाग्ंसि वा एतत्पशुग्ं सचन्ते यदेकदेवत्य आलब्धो भूयान्भवति यस्यास्ते हरितो गर्भ इत्याह देवत्रैवैनां गमयति रक्षसामपहत्या आ वर्तन वर्तयेत्याह [१] ब्रह्मणैवैनमा वर्तयति वि ते भिनद्मि तकरीमित्याह यथायजुरेवैतदुरुद्रप्सो विश्वरूप इन्दुरित्याह प्रजा वै पशव इन्दुः प्रजयैवैनं पशुभिः समर्धयति दिवं वै यज्ञस्य व्यृद्धं गच्छति पृथिवीमतिरिक्तं तद्यन्न शमयेदार्तिमार्छेद्यजमानो मही द्यौः पृथिवी च न इत्या- [२] ह द्यावापृथिवीभ्यामेव यज्ञस्य व्यृद्धं चाऽतिरिक्तं च शमयति नाऽऽर्तिमार्छति यजमानो भस्मनाऽभि समूहति स्वगाकृत्या अथो अनयोर्वा एष गर्भोऽनयोरेवैनं दधाति यदवद्येदति तद्रेचयेद्यन्नाऽवद्येत्पशोरालब्धस्य नाऽव द्येत्पुरस्तान्नाभ्या अन्यदवद्येदुपरिष्टादन्यत्पुरस्ताद्वै नाभ्यै [३] प्राण उपरिष्टादपानो यावानेव पशुस्तस्याऽव द्यति विष्णवे शिपिविष्टाय जुहोति यद्वै यज्ञस्याऽतिरिच्यते यः पशोर्भूमा या पुष्टिस्तद्विष्णुः शिपिविष्टोऽतिरिक्त एवाऽतिरिक्तं दधात्यतिरिक्तस्य शान्त्या अष्टापूद्धिरण्यं दक्षिणाष्टापदी ह्येषाऽऽत्मा नवमः पशोराप्त्या अन्तरकोश उष्णीषेणाऽऽविष्टितं भवत्येवमिव हि पशुरुल्बमिव चर्मैव माग्ंसमिवाऽस्थीव यावानेव पशुस्तमाप्त्वाऽव रुन्धे यस्यैषा यज्ञे प्रायश्चित्तिः क्रियत इष्ट्वा

वसीयान्भवति॥[४]

वर्तयेत्याह न इति वैनाभ्या उल्बमिवैकविग्ंशतिश्च॥3.4.1॥

आ वायो भूष शुचिपा उप नः सहस्रं ते नियुतो विश्ववार। उपो ते अन्धो मद्यमयामि यस्य देव दधिषे पूर्वपेयम्॥ आकूत्यै त्वा कामाय त्वा समृधे त्वा किक्किटा ते मनः प्रजापतये स्वाहा किक्किटा ते प्राणं वायवे स्वाहा किक्किटा ते चक्षुः सूर्याय स्वाहा किक्किटा ते श्रोत्रं द्यावापृथिवीभ्याग् स्वाहा किक्किटा ते वाचग्ं सरस्वत्यै स्वाहा [५] त्वं तुरीया वशिनी वशाऽसि सकृद्यत्त्वा मनसा गर्भ आऽशयत्। वशा त्वं वशिनी गच्छ देवान्थ्सत्याः सन्तु यजमानस्यकामाः॥ अजाऽसि रयिष्ठा पृथिव्याग्ं सीदोर्ध्वाऽन्तरिक्षमुप तिष्ठस्व दिवि ते बृहद्भाः। तन्तुं तन्वन्रजसो भानुमन्विहि ज्योतिष्मतः पथो रक्ष धिया कृतान्। अनुल्बणं वयत जोगुवामपो मनुर्भव जनया दैव्यं जनम्॥ मनसो हविरसि प्रजापतेर्वर्णो गात्राणां ते गात्रभाजो भूयास्म॥[६]

सरस्वत्यै स्वाहा मनुस्त्रयोदश च॥3.4.2॥

इमे वै सहाऽऽस्तां ते वायुर्व्यवात्ते गर्भमदधातां तग्ं सोमः प्राऽजनयदग्निरग्रसत स एतं प्रजापतिराग्नेयमष्टाकपालमपश्यत्तं निरवपत्तेनैवैनामग्नेरधि निरक्रीणात्तस्मादप्यन्यदेवत्यामालभमान आग्नेयमष्टाकपालं पुरस्तान्निर्वपेदग्नेरेवैनामधि निष्क्रीयाऽऽलभते यद्- [७] वायुर्व्यवात्तस्माद्वायव्या यदिमे गर्भमदधातां तस्माद्द्यावापृथिव्या यथ्सोमः प्राऽजनयदग्निरग्रसत तस्मादग्नीषोमीया यदनयोर्वियत्योर्वागवदत्तस्माथ्सारस्वती यत्प्रजापतिरग्नेरधि

निरक्रीणात्तस्मात्प्राजापत्या सा वा एषा सर्वदेवत्या यदजा वशा वायव्यामा लभेत भूतिकामो वायुर्वै क्षेपिष्ठा देवता वायुमेव स्वेन [८] भागधेयेनोप धावति स एवैनं भूतिं गमयति द्यावापृथिव्यामा लभेत कृषमाणः प्रतिष्ठाकामो दिव एवास्मै पर्जन्यो वर्षति व्यस्यामोषधयो रोहन्ति समर्धुकमस्य सस्यं भवत्यग्नीषोमीयामा लभेत यः कामयेताऽन्नवानन्नादः स्यामित्यग्निनैवाऽन्नमव रुन्धे सोमेनाऽन्नाद्यमन्नवानेवाऽन्नादो भवति सारस्वतीमा लभेत य [९] ईश्वरो वाचो वदितोः सन्वाचं न वदेद्वाग्वै सरस्वती सरस्वतीमेव स्वेन भागधेयेनोप धावति सैवाऽस्मिन्वाचं दधाति प्राजापत्यामा लभेत यः कामयेताऽनभिजितमभि जयेयमिति प्रजापतिः सर्वा देवता देवताभिरेवानभिजितमभि जयति वायव्ययोपाकरोति वायोरेवैनामवरुध्याऽऽ लभत आकूत्यै त्वा कामाय त्वे- [१०] त्याह यथायजुरेवैतत्किक्किटाकारं जुहोति किक्किटाकारेण वै ग्राम्याः पशवो रमन्ते प्राऽऽरण्याः पतन्ति यत्किक्किटाकारं जुहोति ग्राम्याणां पशूनां धृत्यै पर्यग्नौ क्रियमाणे जुहोति जीवन्तीमेवैनाग्ं सुवर्गं लोकं गमयति त्वं तुरीया वशिनी वशासीत्याह देवत्रैवैनां गमयति सत्याः सन्तु यजमानस्य कामा इत्याहैष वै कामो [११] यजमानस्य यदनार्त उदृचं गच्छति तस्मादेवमाहाऽजाऽसि रयिष्ठेत्याहैष्वेवैनां लोकेषु प्रतिष्ठापयति दिवि ते बृहद्भा इत्याह सुवर्ग एवाऽस्मै लोके ज्योतिर्दधाति तन्तुं तन्वन्रजसो भानुमन्विहीत्याहेमानेवाऽस्मै लोकाञ्ज्योतिष्मतः करोत्यनुल्बणं वयत जोगुवामप इत्या- [१२] ह यदेव यज्ञ उल्बणं क्रियते तस्यैवैषा शान्तिर्मनुर्भव जनया दैव्यं जनमित्याह मानव्यो वै प्रजास्ता एवाऽद्याः कुरुते मनसो हविरसीत्याह स्वगाकृत्यै गात्राणां ते गात्रभाजो भूयास्मेत्याहाऽऽशिषमेवैतामा शास्ते तस्यै वा एतस्या एकमेवाऽदेवयजनं

यदालब्धायामभ्रो [१३] भवति यदालब्धायामभ्रः स्यादप्सु वा प्रवेशयेथ्सर्वां वा प्राऽश्नीयाद्यदप्सु प्रवेशयेद्यज्ञवेशसं कुर्याथ्सर्वामेव प्राऽश्नीयादिन्द्रियमेवात्मन्धत्ते सा वा एषा त्रयाणामेवाऽवरुद्धा संवथ्सरसदः सहस्रयाजिनो गृहमेधिनस्त एवैतया यजेरन्तेषामेवैषाऽऽप्ता॥[१४]

*यथ्स्वेन सारस्वतीमा लभेत यः कामाय त्वा कामोऽप इत्यब्भ्रो द्विचत्वारिग्ंशच्च॥**3.4.3***॥

चित्तं च चित्तिश्चाऽकूतं चाऽऽकूतिश्च विज्ञातं च विज्ञानं च मनश्च शक्वरीश्च दर्शश्च पूर्णमासश्च बृहच्च रथन्तरं च प्रजापतिर्जयानिन्द्राय वृष्णे प्राऽयच्छदुग्रः पृतनाज्येषु तस्मै विशः समनमन्त सर्वाः स उग्रः स हि हव्यो बभूव देवासुराः संयत्ता आसन्थ्स इन्द्रः प्रजापतिमुपाऽधावत्तस्मा एताञ्जयान्प्राऽयच्छत्तानजुहोत्ततो वै देवा असुरानजयन् यदजयन्तज्जयानां जयत्वग्ग् स्पर्धमानेनैते होतव्या जयत्येव तां पृतनाम्॥[१५]

*उप पञ्चविग्ंशतिश्च॥**3.4.4***॥

अग्निर्भूतानामधिपतिः स माऽवत्विन्द्रो ज्येष्ठानां यमः पृथिव्या वायुरन्तरिक्षस्य सूर्यो दिवश्चन्द्रमा नक्षत्राणां बृहस्पतिर्ब्रह्मणो मित्रः सत्यानां वरुणोऽपाग्ं समुद्रः स्त्रोत्यानामन्नग्ं साम्राज्यानामधिपति तन्माऽवतु सोम ओषधीनाग्ं सविता प्रसवानाग्ं रुद्रः पशूनां त्वष्टा रूपाणां विष्णुः पर्वतानां मरुतो गणानामधिपतयस्ते मावन्तु पितरः पितामहाः परेऽवरे ततास्ततामहा इह माऽवत। अस्मिन्ब्रह्मन्नस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मन्नस्यां देवहूत्याम्॥[१६]

अवरे सप्तदश च॥3.4.5॥

देवा वै यद्यज्ञे ऽकुर्वत तदसुरा अकुर्वत ते देवा एतानभ्यातानानपश्यन्तानभ्यातन्वत यद्देवानां कर्माऽऽसीदार्ध्यत तद्यदसुराणां न तदार्ध्यत येन कर्मणेर्थ्सेत्तत्र होतव्या ऋध्नोत्येव तेन कर्मणा यद्विश्वे देवाः समभरन्तस्मादभ्याताना वैश्वदेवा यत्प्रजापतिर्जयान्प्राऽयच्छत्तस्माज्जयाः प्राजापत्याः [१७] यद्राष्ट्रभृद्भी राष्ट्रमाऽददत तद्राष्ट्रभृताग्ं राष्ट्रभृत्त्वं ते देवा अभ्यातानैरसुरानभ्यातन्वत जयैरजयन्राष्ट्रभृद्भी राष्ट्रमाददत यद्देवा अभ्यातानैरसुरानभ्यातन्वत तदभ्यातानानामभ्यातानत्वं यज्जयैरजयन्तज्जयानां जयत्वं यद्राष्ट्रभृद्भी राष्ट्रमाऽददत तद्राष्ट्रभृताग्ं राष्ट्रभृत्त्वं ततो देवा अभवन्पराऽसुरा यो भ्रातृव्यवान्थ्स्याथ्स एताञ्जुहुयादभ्यातानैरेव भ्रातृव्यानभ्यातनुते जयैर्जयति राष्ट्रभृद्भी राष्ट्रमा दत्ते भवत्यात्मना परास्य भ्रातृव्यो भवति॥[१८]

प्राजापत्यास्सौऽष्टादश च॥3.4.6॥

ऋताषाड्तधामाऽग्निर्गन्धर्वस्तस्यौषधयोऽप्सरस ऊर्जो नाम स इदं ब्रह्म क्षत्रं पातु ता इदं ब्रह्म क्षत्रं पान्तु तस्मै स्वाहा ताभ्यः स्वाहा सग्ंहितो विश्वसामा सूर्यो गन्धर्वस्तस्य मरीचयोऽप्सरस आयुवः सुषुम्नः सूर्यरश्मिश्चन्द्रमा गन्धर्वस्तस्य नक्षत्राण्यप्सरसो बेकुरयो भुज्युः सुपर्णो यज्ञो गन्धर्वस्तस्य दक्षिणा अप्सरसः स्तवाः प्रजापतिर्विश्वकर्मा मनो [१९] गन्धर्वस्तस्यर्क्सामान्यप्सरसो वह्नय इषिरो विश्वव्यचा वातो गन्धर्वस्तस्याऽऽपोऽप्सरसो मुदा भुवनस्य पते यस्य त उपरि गृहा

इह च। स नो रास्वाऽज्यानिग्ं रायस्पोषग्ं सुवीर्यग्ं संवथ्सरीणाग् स्वस्तिम्॥ परमेष्ठ्यधिपतिर्मृत्युर्गन्धर्वस्तस्य विश्वमप्सरसो भुवः सुक्षितिः सुभूतिर्भद्रकृथ्सुववान्पर्जन्यो गन्धर्वस्तस्य विद्युतोऽप्सरसो रुचो दूरेहेतिरमृडयो [२०] मृत्युर्गन्धर्वस्तस्य प्रजा अप्सरसो भीरुवश्चारुः कृपणकाशी कामो गन्धर्वस्तस्याऽऽधयोऽप्सरसः शोचयन्तीर्नाम स इदं ब्रह्म क्षत्रं पातु ता इदं ब्रह्म क्षत्रं पान्तु तस्मै स्वाहा ताभ्यः स्वाहा स नो भुवनस्य पते यस्य त उपरि गृहा इह च। उरु ब्रह्मणेऽस्मै क्षत्राय महि शर्म यच्छ॥[२१]

मनोऽमृडयषट्चत्वारिग्ंशच्च॥3.4.7॥

राष्ट्रकामाय होतव्या राष्ट्रं वै राष्ट्रभृतो राष्ट्रेणैवाऽस्मै राष्ट्रमव रुन्धे राष्ट्रमेव भवत्यात्मने होतव्या राष्ट्रं वै राष्ट्रभृतो राष्ट्रं प्रजा राष्ट्रं पशवो राष्ट्रं यच्छ्रेष्ठो भवति राष्ट्रेणैव राष्ट्रमव रुन्धे वसिष्ठः समानानां भवति ग्रामकामाय होतव्या राष्ट्रं वै राष्ट्रभृतो राष्ट्रग्ं सजाता राष्ट्रेणैवास्मै राष्ट्रग्ं सजातानव रुन्धे ग्रा- [२२] म्येव भवत्यधिदेवने जुहोत्यधिदेवन एवाऽस्मै सजातानव रुन्धे त एनमवरुद्धा उप तिष्ठन्ते रथमुख ओजस्कामस्य होतव्या ओजो वै राष्ट्रभृत ओजो रथ ओजसैवाऽस्मा ओजोऽव रुन्ध ओजस्व्येव भवति यो राष्ट्रादपभूतः स्यात्तस्मै होतव्या यावन्तोऽस्य रथाः स्युस्तान्ब्रूयाद्युङ्ध्वमिति राष्ट्रमेवाऽस्मै युनक्त्या- [२३] हुतयो वा एतस्याऽक्लुप्ता यस्य राष्ट्रं न कल्पते स्वरथस्य दक्षिणं चक्रं प्रवृह्य नाडीमभि जुहुयादाहुतीरेवाऽस्य कल्पयति ता अस्य कल्पमाना राष्ट्रमनु कल्पते संग्रामे संयत्ते होतव्या राष्ट्रं वै राष्ट्रभृतो राष्ट्रे खलु वा एते व्यायच्छन्ते ये संग्रामग्ं संयन्ति यस्य पूर्वस्य जुह्वति स एव भवति जयति

तग्ं संग्रामं मान्धुक इध्मो [२४] भवत्यङ्गारा एव प्रतिवेष्टमाना अमित्राणामस्य सेनां प्रति वेष्टयन्ति य उन्माद्येत्तस्मै होतव्या गन्धर्वाप्सरसो वा एतमुन्मादयन्ति य उन्माद्यत्येते खलु वै गन्धर्वाप्सरसो यद्राष्ट्रभृतस्तस्मै स्वाहा ताभ्यः स्वाहेति जुहोति तेनैवैनाङ्छमयति नैयग्रोध औदुम्बर आश्वत्थः प्लाक्ष इतीध्मो भवत्येते वै गन्धर्वाप्सरसां गृहाः स्व एवैना- [२५] नायतने शमयत्यभिचरता प्रतिलोमग्ं होतव्याः प्राणानेवाऽस्य प्रतीचः प्रति यौति तं ततो येन केन च स्तृणुते स्वकृत इरिणे जुहोति प्रदरे वैतद्वा अस्यै निर्ऋतिगृहीतं निर्ऋतिगृहीत एवैनं निर्ऋत्या ग्राहयति यद्वाचः क्रूरं तेन वषट्करोति वाच एवैनं क्रूरेण प्र वृश्चति ताजगार्तिमार्छति यस्य कामयेताऽन्नाद्य- [२६] मा ददीयेति तस्य सभायामुत्तानो निपद्य भुवनस्य पत इति तृणानि सं गृह्णीयात्प्रजापतिर्वै भुवनस्य पतिः प्रजापतिनैवाऽस्याऽन्नाद्यमा दत्त इदमहममुष्यामुष्याऽऽयणस्याऽन्नाद्यग्ं हरामी त्याहाऽन्नाद्यमेवाऽस्य हरतिषड्भिर्हरति षड्वा ऋतवः प्रजापतिनैवाऽस्याऽन्नाद्यमादायर्तवोऽस्मा अनु प्र यच्छन्ति [२७] यो ज्येष्ठबन्धुरपभूतः स्यात्तग्ग् स्थलेऽवसाय्य ब्रह्मौदनं चतुःशरावं पक्त्वा तस्मै होतव्या वर्ष्म वै राष्ट्रभृतो वर्ष्म स्थलं वर्ष्मणैवैनं वर्ष्म समानानां गमयति चतुःशरावो भवति दिक्ष्वेव प्रति तिष्ठति क्षीरे भवति रुचमेवाऽस्मिन्दधात्युद्धरति शृतत्वाय सर्पिष्वान्भवति मेध्यत्वाय चत्वार आर्षेयाः प्राऽश्नन्ति दिशामेव ज्योतिषि जुहोति॥ [२८]

ग्रामी युनक्तीध्मस्व एवैनानन्नाद्यं यच्छन्त्येकान्न पञ्चाशच्च॥3.4.8॥

देविका निर्वपेत्प्रजाकामश्छन्दाग्ंसि वै देविकाश्छन्दाग्ंसीव खलु वै

प्रजाश्छन्दोभिरेवाऽस्मै प्रजाः प्र जनयति प्रथमं धातारं करोति मिथुनी एव तेन करोत्यन्वेवाऽस्मा अनुमतिर्मन्यते राते राका प्र सिनीवाली जनयति प्रजास्वेव प्रजातासु कुह्वा वाचं दधात्येता एव निर्वपेत्पशुकामश्छन्दाग्ंसि वै देविकाश्छन्दाग्ंसी- [२९] व खलु वैपशवश्छन्दोभिरेवाऽस्मै पशून्प्र जनयति प्रथमं धातारं करोति प्रैव तेन वापयत्यन्वेवाऽस्मा अनुमतिर्मन्यते राते राका प्र सिनीवाली जनयति पशूनेव प्रजातान्कुह्वा प्रति ष्ठापयत्येता एव निर्वपेद्ग्रामकामश्छन्दाग्ंसि वै देविकाश्छन्दाग्ंसीव खलु वै ग्रामश्छन्दोभिरेवाऽस्मै ग्राम- [३०] मव रुन्धे मध्यतो धातारं करोति मध्यत एवैनं ग्रामस्य दधात्येता एव निर्वपेज्ज्योगामयावी छन्दाग्ंसि वै देविकाश्छन्दाग्ंसि खलु वा एतमभि मन्यन्ते यस्य ज्योगामयति छन्दोभिरेवैनमगदं करोति मध्यतो धातारं करोति मध्यतो वा एतस्याऽक्लुप्तं यस्य ज्योगामयति मध्यत एवाऽस्य तेन कल्पयत्येता एव र्नि- [३१] वपेद्यं यज्ञो नोपनमेच्छन्दाग्ंसि वै देविकाश्छन्दाग्ंसि खलु वा एतं नोप नमन्ति यं यज्ञो नोपनमति प्रथमं धातारं करोति मुखत एवाऽस्मै छन्दाग्ंसि दधात्युपैनं यज्ञो नमत्येता एव निर्वपेदीजानश्छन्दाग्ंसि वै देविका यातयामानीव खलु वा एतस्य छन्दाग्ंसि य ईजान उत्तमं धातारं करो- [३२] त्युपरिष्टादेवाऽस्मै छन्दाग् स्ययातयामान्यव रुन्ध उपैनमुत्तरो यज्ञो नमत्येता एव निर्वपेद्यं मेधा नोपनमेच्छन्दाग्ंसि वै देविकाश्छन्दाग्ंसि खलु वा एतं नोप नमन्ति यं मेधा नोपनमति प्रथमं धातारं करोति मुखत एवाऽस्मै छन्दाग्ंसि दधात्युपैनं मेधा नमत्येता एव निर्वपे- [३३] दुक्कामश्छन्दाग्ंसि वै देविकाश्छन्दाग्ंसीव खलु वै रुक्छन्दोभिरेवाऽस्मिन्नुचं दधाति क्षीरे भवन्ति रुचमेवाऽस्मिन्दधति मध्यतो धातारं

करोति मध्यत एवैनग्ं रुचो दधाति गायत्री वा अनुमतिस्त्रिष्टुग्राका जगती सिनीवाल्यनुष्टुप्कुहूर्धाता वषट्कारः पूर्वपक्षो राकाऽपरपक्षः कुहूरमावास्या सिनीवाली पौर्णमास्यनुमतिश्चन्द्रमा धाताऽष्टौ [३४] वसवोऽष्टाक्षरा गायत्र्येकादश रुद्रा एकादशाक्षरा त्रिष्टुब्द्वादशाऽऽदित्या द्वादशाक्षरा जगती प्रजापतिरनुष्टुब्धाता वषट्कार एतद्वै देविकाः सर्वाणि च छन्दाग्ंसि सर्वाश्च देवता वषट्कारस्ता यथ्सह सर्वा निर्वपेदीश्वरा एनं प्रदहो द्वे प्रथमे निरुप्य धातुस्तृतीयं निर्वपेत्तथो एवोत्तरे निर्वपेत्तथैनं न प्र दहन्त्यथो यस्मै कामाय निरुप्यन्ते तमेवाऽऽभिरुपाऽऽप्नोति॥[३५]

*पशुकामश्छन्दाग्ंसि वै देविकाश्छन्दाग्ंसि ग्रामं कल्पयत्येता एव निरुत्तमं धातारं करोति मेधा नमत्येता एव निर्वपेदष्टौ दहन्ति नव च॥**3.4.9**॥*

देविकाः प्रजाकामो मिथुनी प्रजानु पशुकामः प्रैव ग्रामकामो ज्योगामयावीयं यज्ञो य ईजानो यं मेधा रुक्कामोऽष्टौ॥ देविका भवन्ति दधति राष्ट्रकामाय भवति दधाति॥

वास्तोष्पते प्रति जानीह्यस्मान्थ्स्वावेशो अनमीवो भवा नः। यत्त्वेमहे प्रति तन्नो जुषस्व शं न एधि द्विपदे शं चतुष्पदे॥ वास्तोष्पते शग्मया सग्ंसदा ते सक्षीमहि रण्वया गातुमत्या। आवः क्षेम उत योगे वरं नो यूयं पात स्वस्तिभिः सदा नः॥ यथ्सायं प्रातरग्निहोत्रं जुहोत्याहुतीष्टका एव ता उप धत्ते [३६] यजमानोऽहोरात्राणि वा एतस्येष्टका य आहिताग्निर्यथ्सायं प्रातर्जुहोत्यहोरात्राण्येवाऽऽप्त्वेष्टकाः कृत्वोप धत्ते दश समानत्र जुहोति दशाक्षरा विराड्विराजमेवाऽऽप्त्वेष्टकां कृत्वोप धत्तेऽथो विराज्येव यज्ञमाप्नोति चित्यश्चित्योऽस्य भवति तस्माद्यत्र दशोषित्वा प्रयाति तद्यज्ञवास्त्ववास्त्वेव तद्यत्ततोऽर्वाचीनग्ं [३७] रुद्रः खलु वै वास्तोष्पतिर्यदहुत्वा

वास्तोष्पतीयं प्रयायादुद्व एनं भूत्वाऽग्निरनूत्था यहन्याद्वास्तोष्पतीयं जुहोति भागधेयेनैवैनग्ं शमयति नाऽऽर्तिमार्छति यजमानो यद्युक्ते जुहुयाद्यथा प्रयाते वास्तावाहुतिं जुहोति तादृगेव तद्यदयुक्ते जुहुयाद्यथा क्षेम आहुतिं जुहोति तादृगेव तदहुतमस्य वास्तोष्पतीयग्ग् स्या- [३८] द्दक्षिणो युक्तो भवति सव्योऽयुक्तोऽथ वास्तोष्पतीयं जुहोत्युभयमेवाऽकरपरिवर्गमेवैनग्ं शमयति यदेकया जुहुयाद्दर्विहोमं कुर्यात्पुरोऽनुवाक्यामनूच्य याज्यया जुहोति सदेवत्वाय यद्भुत आदध्यादुद्वं गृहानन्वारोहयेद्यदवक्षाणान्यसं प्रक्षाप्य प्रयायाद्यथा यज्ञवेशसं वाऽऽदहनं वा तादृगेव तदयं ते योनिर्ऋत्विय इत्यरण्योः समारोहय- [३९] त्येष वा अग्नेर्योनिः स्व एवैनं योनौ समारोहयत्यथो खल्वाहुर्यदरण्योः समारूढो नश्येदुदस्याऽग्निः सीदेत्पुनराधेयः स्यादिति या ते अग्ने यज्ञिया तनूस्तयेह्या रोहेत्यात्मन्थ्समारोहयते यजमानो वा अग्नेर्योनिः स्वायामेवैनं योन्याग्ं समारोहयते॥[४०]

धत्तेऽर्वाचीनग्ग् स्याथ्समारोहयति पञ्चचत्वारिग्ंशच्च॥3.4.10॥

त्वमग्ने बृहद्वयो दधासि देव दाशुषे। कविर्गृहपतिर्युवा॥ हव्यवाडग्निरजरः पिता नो विभुर्विभावा सुदृशीको अस्मे। सुगार्हपत्याः समिषो दिदीह्यस्मद्रियक्सं मिमीहि श्रवाग्ंसि॥ त्वं च सोम नो वशो जीवातुं न मरामहे। प्रियस्तोत्रो वनस्पतिः॥ ब्रह्मा देवानां पदवीः कवीनामृषिर्विप्राणां महिषो मृगाणाम्। श्येनो गृध्राणाग्ं स्वधितिर्वनानाग्ं सोमः [४१] पवित्रमत्येति रेभन्न्॥ आ विश्वदेवग्ं सत्पतिग्ं सूक्तैरद्या वृणीमहे। सत्यसवग्ं सवितारम्॥ आ सत्येन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च। हिरण्ययेन सविता रथेनाऽऽ देवो याति भुवना विपश्यन्न्॥

यथा नो अदितिः करत्पश्वे नृभ्यो यथा गवे। यथा तोकाय रुद्रियम्॥ मा नस्तोके तनये मा न आयुषि मा नो गोषु मा [४२] नो अश्वेषु रीरिषः। वीरान्मा नो रुद्र भामितो वधीर्हविष्मन्तो नमसा विधेम ते॥ उदप्रुतो न वयो रक्षमाणा वावदतो अभ्रियस्येव घोषाः। गिरिभ्रजो नोर्मयो मदन्तो बृहस्पतिमभ्यर्का अनावन्॥ हग्ंसैरिव सखिभिर्वावदद्भिरश्मन्मयानि नहना व्यस्यन्। बृहस्पतिरभिकनिक्रदद्गा उत प्रास्तौदुच्च विद्वाग्ं अगायत्॥ एन्द्र सानसिग्ं रयिग्ं [४३] सजित्वानग्ं सदासहम्। वर्षिष्ठमूतये भर॥ प्र ससाहिषे पुरुहूत शत्रूञ्ज्येष्ठस्ते शुष्म इह रातिरस्तु। इन्द्राऽऽ भर दक्षिणेना वसूनि पतिः सिन्धूनामसि रेवतीनाम्॥ त्वग्ं सुतस्य पीतये सद्यो वृद्धो अजायथाः। इन्द्र ज्यैष्ठ्याय सुक्रतो॥ भुवस्त्वमिन्द्र ब्रह्मणा महान्भुवो विश्वेषु सवनेषु यज्ञियः। भुवो नृग्श्यौल्नो विश्वस्मिन्भरे ज्येष्ठश्च मन्त्रो [४४] विश्वचर्षणे॥ मित्रस्य चर्षणीधृतः श्रवो देवस्य सानसिम्। सत्यं चित्रश्रवस्तमम्॥ मित्रो जनान् यातयति प्रजानन्मित्रो दाधार पृथिवीमुत द्याम्। मित्रः कृष्टीरनिमिषाऽभि चष्टे सत्याय हव्यं घृतवद्विधेम॥ प्र स मित्र मर्तो अस्तु प्रयस्वान् यस्त आदित्य शिक्षति व्रतेन। न हन्यते न जीयते त्वोतो नैनमग्ंहो अश्नोत्यन्तितो न दूरात्॥ य- [४५] च्चिद्धि ते विशो यथा प्र देव वरुण व्रतम्। मिमीमसि द्यविद्यवि॥ यत्किं चेदं वरुण दैव्ये जनेऽभिद्रोहं मनुष्याश्चरामसि। अचित्ती यत्तव धर्मा युयोपिम मा नस्तस्मादेनसो देव रीरिषः॥ कितवासो यद्रिरिपुर्न दीवि यद्वा घा सत्यमुत यन्न विद्म। सर्वा ता वि ष्य शिथिरेव देवाऽथा ते स्याम वरुण प्रियासः॥[४६]

सोमो गोषु मा रयिं मन्त्रो यच्छिथिरा सप्त च॥3.4.11॥

वि वा एतस्या ऽऽवायो इमेवै चित्तं चाग्निर्भूतानां देवा वा अभ्यातानासृताषाड्राष्ट्र कामाय देविका वास्तोष्पते

त्वमग्ने बृहद्वय एकादश॥11॥

विवा एतस्ये त्याह मृत्युर्गन्धर्वोऽव रुन्धे मध्यतस्त्वमग्ने बृहथ्षट्चत्वारिग्ंशत्॥४६॥

विवा एतस्य प्रियासः॥

॥ हरिः ओम्॥

॥ श्री कृष्णार्पणमस्तु॥

॥ इति तृतीयकाण्डे चतुर्थः प्रश्नः॥